नं० ४६००८ — घ

दुर्गोत्सव प्रकरणम्

पत्राणि २०

नं० ४६०४-घ

दुर्गोत्सवप्रकरणम्

नं० ४७०४ — घ

पत्राणि २०

4704

F. = 20

दि शुक्लनवमीपर्यंतं देवीपूजायामेकः कल्पः तथा मातृपदादिनवम्यंतं षष्ठ्यादिनवम्यंतं सप्तम्यादिनवम्यंतं अष्टम्यादिनवम्यंतं केवलाष्टमी कि
वलनवमी चेति सप्त कल्पाः उक्तेषु पाहूति भन्यथ्ववत्तौ पार्दीनवम्यंतकल्पो नवरात्र प्रसिद्धो ग्रहणव्याः एवं चानेकाहसाध्यपूजास्थलेत त्रि
प्युक्ते स्नानंतरं आरभ्य दशमीं यावत् शारत्कालीपदुर्गापूजनमिति यथासंभवं संकल्पवाक्ये प्रयोज्यं अन्यायसंकल्पकालीनतिथेरन्य अ
संभवादनन्यपापत्तिरिति भिन्नं अत्र च प्रजपाकाम्यत्वेन नित्यत्वेन वाऽकरणे व्रतत्वानलत्वारंभदिने वोद्दिवो च नादेमा गोभ अंगाधिकार्य प्रधानसं
कल्पः कार्यः अतएव देवादिपिपुजा अधिवासदिने अंगाधिकार्यं तद्धीजम्भूतकामप्रधानाधिकारः सप्रकारकः कुशतिलजलसागसहितं काम्या
भिलाषपूर्वकं प्रधानसंकल्पः कार्यः इति हेतनिर्णयकारेणोक्तं अतो दिनांतरेन संकल्पांतरमिपि शारत्कालिमहापूजेसर्वैकवचनश्रुतेरेकप्र
योगसाध्यत्वेनराकव्यकता पत्नंक्रियाकलापपूजन्यस्यवा कार्थीभूतनियोगस्येकादर्शवत् ननु भ्रसेवं तन्नत्कर्मणा संकल्पः कलिकापूर्व
जनकत्वात् रौद्रध्याद्रियागवदिति तस्मान्न महाचार्येणाप्युक्तं दुर्गापूजा नित्या काम्या च तस्या अनिवर्षेकर्तव्यत्वश्रवणात् अकरणे प्रत्यवा
यश्रवणात् न करणे विधिसमभिव्याहृतवचनवाक्येन फलश्रवणाच्च तत्र देवीपुराणे हिशरीरं चैव ततेनैव भूगते रवौ वर्षवर्षे विधातव्यं स्थाप
नं च विसर्जनमिति हिशरीरे कन्यायां भानौ चरेतुल्यायामेव चैवेत्र दुर्गोत्सवे पूर्वाह्ने मीनमेषलग्नयोरपि संभवात् तथा शारदीयां पूजाम
धिकृत्य कालिकापुराणे यो मोहादथवालोभाद्देवीं दुर्गां महोत्सवे न पूजयति दम्भाद्द्वेषाद्वाप्य भैरव क्रुद्धा भगवती तस्य कामानिति शान्निहंति
हृदति तथा तत्रैव सैव परमामा पुनर्नित्या त्रिस्तिको वत्सः एवमन्यैरपि सद्दारेव्याः कार्यं प्रपूजनं विघ्नतिमतुलं लब्ज चतुर्वर्गप्रदायक पूजयेदिस

ष्विह्नसमधिचोक्तेरपि भवानीतुष्टये पार्थ संवत्सरसुखाय चामृतमित्यपि स्मासनां शार्थे चोत्सवाय च तथा देवीपुराणेपि तुष्ट्यायां नवदुर्गायां निमे
१ पाईनयस्फलं नतद्वक्तुं महे यो शक्नो वर्षशतैरपि पूर्वं चातुर्लाविभूत्यादिमिलितफलं वा दुर्गाप्रीति वीतत्कं सोक्तं फलं वा निर्दिष्टामिति निस्तत्वका
मत्वयोरेकत्र समावेशे संयोगपृथक्त्वन्याय एव मूलमिति द्वयं च काम्यत्वेन पूजने कृते प्रसंगान्नित्यपूजायाः सिद्धिरिति अत्र च नारिनसाध्य
पूजास्थले अंमुकतिथावारभ्य दशमीयावदिति वाक्यप्रयोग उक्तः तत्र पूजा प्रतिपदादेव वा केपि तथा दृश्यते यथाज्ञिकनयनं नयसंग्रहे
धे दृष्टेत आरभ्यात स्यां दशमीं तु यावन्म पूजयेसर्वतस्तु जपुजत्रिमिति दशमीं यावदिति। अत्र यावन्मर्यादार्थे नाभिविधौ दशम्यां विसर्जनमात्रे
तया तत्र पूजाया अनभिधानात् तत् यद्देवीपुराणोक्तं मासस्येश्वयुजस्य शुक्लामारभ्य नन्दिकामिसुयत्नात् महानवम्यां पूजयेत्स्वर्गमोक्षप्रदाय
नी यत्र पूजे यमित्येकवचनात् निर्दिष्टं शुक्लप्रतिपत्प्रभृति नवमीपर्यन्तमेका पूजेत्युक्तं नवम्यामिति विसर्जनातिरिक्तकर्माभिप्रायेण नवरात्र
पूजाविषयकमेव तत्र अत्र नन्दिका प्रतिपत् दुर्गा नितरां गिणीकारेणापि तयोक्तं तिथित्वेस्मार्तं भद्राचार्येण नन्दिकपर्वसेव भुक्तं प्रतिपत्कल्पस्तु
अग्नेन वराहरूपेणासम्यक् तथा प्रतिपादयिष्यते सर्वत्रैव पूजाकर्त्ये आरब्धे उत्पन्नं अशौचं प्रतिबन्धकं तथा एव च भद्र प्रनन्दिसुवाकं जनपज्ञ
विवाहपुष्पाहे होमे तथा जपे आरब्धे सूतकं न स्यादनारब्धे तु सूतकं आरंभो वरणं यज्ञे संकल्पो व्रतजापयोः नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिष्क्रिया रामः
निमंत्रणं तु वा श्राद्धे आरंभः स्यादिति स्मृति अत्र च शरत्कालीनदुर्गापूजायां व्रतत्वेनत्वात् संकल्प एवारंभसंकल्पप्रकारस्तु स्वजन्माष्टमी प्रदर्शित १
इति पापक्षयपरिस्कये नित्यसाग्ने दृष्टश्राद्धविषयं तत्र न स्यात् दुर्धरणस्य साधारणत्वादिति यच्चापि शास्त्रविहितो नियमो व्रतयमोऽभिति सर्वैरवपरिभा

नात्रिपतेतत्रनियमस्यविशेषतोनिर्देशात्केवलकर्ममात्रेनतत्रशान्तिस्तथापुराणादिभिर्महाशिष्टैश्चयत्रव्रतत्वेनपरिभाषणानेनदेवव्रतमितिबोध्यं
यहृतेचशारदायाःप्रजायाःव्रतत्वेनपरिभाषाकृतादेवीपुराणेशारदिरिपूजामधिकृत्यसमहाव्रतंमहापुण्यंशंकराद्यैरनुष्ठितामिति०तथाभागवतेपि
व्यक्तमुक्तंचैतद्द्विधंभुंजानाकासायमप्येनव्रतमिति लिंगपुराणेतुशारत्कालीयदेवीपूजायाश्चतुःकर्ममत्वमाहशारदीयामहापूजाचतुःकर्म
मयीशुभातांतिथित्रयमासाद्यकुर्यान्द्रक्त्याविधानतइतिचतुःकर्ममयीवक्ष्यमाणयुक्तैःस्नपनपूजनबलिदानहोमरूपातिथित्रयंअर्थात्सप्त
म्यादितिथित्रयंसापूजाचत्रिविधाभवतितथापिचगौडदेशेस्कान्देभविष्यपुराणयोःशारदीचंडिकापूजात्रिविधापरिगीयतेसात्विकीजपय
ज्ञाद्यैःनैवेद्यैश्चनिरामिषैःमाहात्म्यंभगवत्याश्चपुराणादिषुकीर्तितंपाठस्तस्यजपःप्रोक्तःपठेद्देवीमनास्तथाराजसीबलिदानेननैवेद्यैःसामिषैस्तथासु
रामांसाद्युपहारैर्जपयज्ञैर्विनातुयाविनामंत्रैस्तामसीस्यात्किरातानांचसंमतेतिएतत्पूजायांसर्वेषामेवाधिकारकारमाहतत्रैवभविष्योत्तरीयंब्रा
ह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरन्यैश्चसेवकैःएवंनानाम्लेच्छगणैःपूज्यतेसर्वदस्युभिरितिदेवीपुराणेस्वयंवाप्यन्यतोवापिपूजयेत्पूजयेन्नयावापू
जयेदितिअत्रहेतुःनिजजन्मताराद्युत्सवासामर्थ्येअन्यद्वारेणतत्संपर्यंकंतन्त्रोपियिरतरापेक्षयाऋत्विगादिद्वारेणतत्करणोपदेशोविशेषःस्नपहोमप
ठनप्रभृतयस्मैननजायतेऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोऽथविट्पतिःएभिरेवहुतंयत्तुतद्धुतंस्वयमेवहीतिस्कन्दवचनेनहोमेतथादर्शनेएकत्र
दर्शनाद्येनान्यत्रापितथाकल्पनासंभवात्विट्पतिःजामाताअन्तरावहयशीर्षपंचरात्रेप्युक्तंअर्चकस्तत्रयोयोगाद्ध्वेनस्यातिशायनात्आ
भिरूप्याद्यविंबानादेवःसान्निध्यमृच्छतीतिविंबानांप्रतिमानांतत्रापिअन्येषाप्रवर्तनेनयजमाननुत्रेवनयोजिकातथाचकूर्मपुराणेऋत्विक्पू

यथवा पत्नी शिष्यो वापि सहोदरः । प्राप्यानुज्ञां विशेषेण जुहुयाद्वा यथाविधि तत्रापि ऋत्विजा धर्मे जपपुनश्चरणे फलाधिकमाह अस्मृतिः अन्यैः
२ शतकृता होमाद्देवः पुत्रकृतो वरः । पुत्रे शतकृता होमा द्देको ह्यात्मकृतो वरः इति अत्र च महापूजायास्मार्तं कर्मत्वान्नियतत्वाच्च यजमानासामर्थ्य
प्रतिनिधिनापि आरंभः कर्तुं शक्यते तथा च माधवाचार्यकृत पराशरी यमाधवे ख्याता तयः श्रौतं कर्म स्वयं कुर्यादन्योपि स्मार्तं समाचरेत् अशक्तौ
श्रौतमप्यन्यः कुर्यादाचारमंततः अंततउपक्रमात् परतः तथा च श्रौतं कर्मनि स्मार्ते नैमित्तिकं वा काम्यं वा भवतु तत्कर्मणा आरंभानंतर
2 मेव यजमानासामर्थ्ये प्रतिनिधिनापि कर्तव्यं स्मार्तेनित्यनैमित्तिककर्मतु अन्येनापि अनेनापि आरभ्यत इत्यर्थः काम्यमात्रं स्मार्तं कर्मतु आरंभा
नंतरं प्रतिनिधिना कर्तुं शक्यते काम्ये प्रतिनिधिर्नास्ति नित्यमाति के हि सः काम्येषूपक्रमादूर्ध्वं केचिदिच्छंति तत्सत्तमा इति वा केनसामान्यत एव
आरंभानंतरं काम्यकर्मणि प्रतिनिध्युक्तेः अत एव स्मार्तं काम्यं प्रतिनिधिनापि आरभ्यते इति स्मार्तं भट्टाचार्येणाप्युक्तं तन्निर्णीतं क्रमेणेति अत्र च तत्र
रत्नपूजाकल्पेषु भविष्यद्दशोचार्यदिशं क्रियापूर्वमेव शुचितत्कालजीवित्वरूपाधिकाराभावेपि यदस्य वा राज्यादिकं यजमानेन नक्रियते तत्कर्म
कालेव लभ्यमाणामन्यदेशक्रमदृष्टामात्रयहि जानं स्वयं प्रवर्तनवत् प्रवर्तनायान्ततस्तदानीं प्रतिनिधीयत इति निर्जियाग्नि स्वदारेषु धिके वाकल्प्यार्त्विजं तत
तथा प्रवसेत्कार्यवान्नविप्रोऽवृत्येवनचिरं वसेदिति च्छंदोगपरिशिष्टोक्त वा साध्यथा तत्र प्रतिनिधीयते एकत्र हस्त्याप्येन तथा त्रायीतिविवा राम
दकल्पतरुरत्नाकरशांतिदीपिकासु नारदः ऋत्विक्चाविधः प्रोक्तः पूर्वैर्य एवं स्वयं कृतः परश्च यापियः कुर्याच्छान्तिर्जं प्रतीति पूर्वं क्रमितिपरश्च यो अत २
एवं संशंस्वलिखितौ राज्ञां पुरोहितो मासस्यप्रवेत्तस्य तस्याश्रयाः नृपतीनामात्म प्रतिनिधिभूतः पुरोहितेनेन नृपते राज्ञो चे पुरोहितस्य यो चाभावात्तू नृपते

ःशांतिकपौष्टिकं स्वयमनुष्ठानं कर्त्तव्यमिति हारलताकारस्य यः आशौचपातेपि पूर्वसंकल्पितद्रव्येण पूजाकरणे न दोषः तथा च गौतमः पूर्वसंकल्पि
ते चार्थे तस्मिन्नाशौचमिष्यते ह्यसच्चिंतामणौ विवाहोत्सवयज्ञेषु अंतरामृतसूतके पूर्वसंकल्पितद्रव्यदीयमानं न दुष्यतीति पूर्वसंकल्पितं आ
शौचात्पूर्वं तद्द्रव्योपकल्पितं द्रव्यमित्यर्थः अत्र च सात्विकपूजायां देवीमाहात्म्यपाठस्य पूर्वमुक्तत्वात् एपच ग्ध्येकात्स्यापितत्वकर्म्मनिष्पत्तिभन
थापि रुद्राक्षीस्तवादिवद्ने कावृत्तौ फलकल्पनेति प्रसंगाद्दिनाभेकावृत्त्यादिफलं तद्विधानं च निर्णायते वाराहीतंत्रे चंडीपाठफलं देवि शृणु
ष्वगदतो मम एकावृत्त्यादिपाठानां यावत्कथयामि ते संकल्पपूर्वसंपूजन्यस्यां गेभुमनन्सकृत् पाठाच्च बलिदानाद्धि सिद्धिमाप्नोति मानवः उ
पसर्गोपशांत्यर्थं त्रिरावृत्तं पठेन्नरः ग्रहोपशांतौ कर्त्तव्यं पंचावृत्तं वरानने महाभये समुत्पन्ने सप्तावृत्तमुदीरयेत् नवावृत्त्या भवेच्छांतिर्वाजपेयफ
लं लभेत् राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् अर्कावृत्तेः कामसिद्धिर्वैरिहानिश्च जायते मन्वावृत्त्या द्विषो नाशस्तथा स्त्री वश्यतामियात् सौख्यं
पंचदशावृत्तं तत् श्रियमाप्नोति मानवः कलावृत्त्या पुत्रपौत्रधनधान्यसमन्वितः राज्ञां भीतिविमोक्षाय वैरस्योच्चाटनाय च कुर्यात्सप्तदशावृत्तं त
थाष्टादशकं प्रिये महाप्रणविमोक्षाय विंशावृत्तं पठेत्सुधीः पंचविंशावर्त्तेनात्तु भवेद्बंधविमोक्षणं संकटे समनुप्राप्ते दुश्चिकित्स्यामये तथा जा
तिध्वंसे कुलोच्छेदे आयुषो नाश आगते वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये तथैव त्रिविधोत्पाते तथा चैवातिपातके कुर्याद्य
त्नाच्छतावृत्तेनेनतः सपद्यते सुखं श्रियो वृद्धिः शतावृत्तेन राज्यवृद्धिस्तथापरे मनसा चिंतितं देवि सिद्धेदष्टोत्तराच्छतात् शताश्वमेधयज्ञानां फलमाप्नो
ति सुव्रते सहस्रावर्त्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा भुक्त्वा मनोरथान् कामान् नरो मोक्षमवाप्नुयात् यथाश्वमेधः क्रतुराट् देवानां च यथा हरिः

रिस्तवानामपि सर्वेषां तथा सन्ततीस्तव अथवा बहुनोक्तेन किमेतेन नवार्णेन चंड्याः शतावृत्तपाठात्सर्वाः सिद्ध्यन्ति सिद्धयः इति ० तथा मार्कण्डेयपुराणे
३ ऽप्युक्तं तथैव मे भक्त्या मम माहात्म्यमुत्तमं न तेषां दुःकृतं किंचिद्दुष्कृतोत्था न चापद इति अत्रापि पठनश्रवणयोः फलश्रवणे न पठन कर्त्तृत्वश्रो
तृत्वसामान्याधिकरण्येनैवोत्सर्गतः फलं भवतीति स्तयापि परगतफलोद्देशेनापि पठनश्रवणाचरणे तत्फलसिद्धिर्भवति महाव्रणविमोक्षाय चि
रात्रवृत्तं पठेत्सुधीरिसादिवाक्यासमहाव्रणिनस्तदानीं पाठेऽधिकाराभावेन तद्गतरोगनाशार्थमन्यथानुपपत्त्या अन्येनापि पठितव्यमिति तात्पर्य
3 कल्पनेऽभिवसात् अत एव महास्वास्थ्यवतः श्रूयते परिरोगशांतिकामेनो मुख्यकामेण चाऽन्येन गृहजपाद्याचरणादिकं यत्ते अतस्वगतपरगतफलसंसारध्या
रत्वयेनैव तद्द्वारा तत्र पठनश्रवणाविधौ तासर्पे कल्प्यत इति एवं दुर्गोत्सवे यजमानं द्विजे उस्वयं शतावृत्तसाहित्यं संकल्पं श्रावास्त सामर्थ्याभावस्तालंका
राघचनेनकेवलात्मावा अन्ये ब्राह्मणा प्रतिनिधीकर्त्तव्याः अथवा यजमानस्यानुपाब्राह्मणा एव तद्गतफलकामा संकल्प्य पठेयुः श्रूयते यज
मानस्यलेतु तद्द्राज्ञ्यानद्गतफलकामनया शतावृत्तसाहित्यं ब्राह्मणा एव संकल्प्य पठेयुः श्रूयते ब्राह्मणानां तत्पाठे अधिकाराभावान्न तत्र संकल्प्य इति अत
एव पठनश्रवणात पाठनश्रावणे अपि कार्ये प्रयोजयितानुमंता कर्त्ता चेति सर्वे स्वर्गनरकभोक्तारोऽपि भूय आरभंते तस्मिन्नफले विशेषः इसायस्त
वेनाप्रवृत्ते प्रवृत्तकलत्तक्षणप्रयोजकस्यापिफलं श्रूयते स्तत्र पाठयिष्ये इति प्रयोगः कर्त्तव्यः इति ० प्रयो एवं भारताद रावण पि० स्मार्त्ते भट्टाचा राम:
र्य्येर्पि प्रदुक्तं नन्वसम्यगिति प्रयोजति भवति तद्वाक्यस्य फलार्थप्रवर्त्तमानपुरुषप्रयोजयितृत्वमुमंत्र विषयकत्वात् दृष्टिक्षणात्रेणैव यजमानगतफलं ३
र्थप्रवर्त्तमानपुरुषप्रयोजकत्वं तातादृशायजमानरूपप्रयोजकानुमंत्र विषयत्वात् एवं चं दक्षिणार्थप्रवर्तशतावृत्तिभारतादि पठनकर्त्तृवि

विषयेतु पाठयिष्ये श्रावयिष्ये श्रावयिष्येवेति यजमानस्य संकल्पेन पुस्तकस्तारम्भाविघ्नदर्शनादितिदिक् प्रहृष्टेनच संकल्पिते चंडीपाठे तत्र ऋषि
छंदःप्रभृतीन्स्मरेत् यथा ॐ अस्य श्री प्रथमचरितस्य ब्रह्माऋषिर्महाकाली देवता गायत्री छंदो नंदा शक्ती रक्तदंतिका बीजमग्निस्तत्त्वं महा
ली प्रीत्यर्थे जपे विनियोगः मध्यमचरितस्य विष्णुऋषिर्महालक्ष्मी देवता अनुष्टुप् छंदः शाकंभरी शक्तिः दुर्गा बीजं सूर्यस्तत्त्वं महालक्ष्मी प्रीत्य
र्थे जपे विनियोगः उत्तरचरितस्य रुद्रऋषिः सरस्वती देवता उष्णिक् छंदो भीमा शक्तिः भ्रामरी बीजं वायुस्तत्त्वं सरस्वती प्रीत्यर्थे जपे विनियोग
ः कल्पतरौ भविष्यपुराणे इतिहासपुराणानि श्रुत्वा भक्त्या विशांपते मुच्यते सर्वपापेभ्यो ब्रह्महत्यादिभिर्विभो ब्राह्मणं वाचकं विद्यान्नान्य
वर्णजमादरात् श्रुत्वान्यवर्णजाद्राजन्वाचकान्नारकं व्रजेत् तथा देवार्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः ग्रंथं च शिथिलं कुर्याद्वाचक कु
रुनंदन पुनर्वेधीत तत्सूत्रं न मुक्त्वा धारयेत् प्रचितं हिरण्यं रजतं पांश्च तथा काम्यो दर्पदोहनाः दत्वा च कायेह भूतस्य प्रोतितस्य लंरातस्य पु
राणीयत्वेन जमान नामकं तथा वाचनात् सूर्यनारायणादिकं नमस्कृत्य तत्तथा चः नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीरयेदि
ति जयपदार्थमाह भविष्यपुराणे अष्टादशपुराणानि रामस्य चरितं तथा विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत कार्ष्णं च पंचमो वेदो यन्ना
माभारतं स्मृतं सौराश्च धर्मराजेंद्र मानवोक्ता महीपते जयेति नाम चैतेषां प्रवदंति मनीषिण इति कालखंडे हेमायनप्रणीतं जपस्तेनेन संसार
मिति जपस्तत्कं थस्तथा मत्स्यसूक्ते वाराहीतंत्रे च प्रणवं चादौ जप्त्वा च स्तोत्रं वा संहितं पाठेत अंते च प्रणवं दद्यादित्युक्त्वा चादि पुरुष्ठे सर्वत्र पाठे वि
शेषात् कन्यथा विफलं भवेत् शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः न कार्यो शक्तमनसा कार्यस्तोत्रस्य वाचनं आधारे स्थापयित्वा तु पुस्तकं व्रज

मेत्सु ध्यौः हस्तसंस्थापनादेव यस्मात्तस्य फलं लभेत् एवं च लिखितं यत्तु हूतिना लिखितं तन्न यत् अब्राह्मणेन लिखितं तच्चापि विफलं भवेत् अथ षिद्धं द्रा
४ दिवत्स्यस्य पठेत्स्तोत्रं विचक्षणः संकल्पितैस्तोत्रपाठसंख्यां कुर्यात्स पठेत्सु ध्यौः अध्यायं नाध्यं विरमेन्न तु कार्ये कादेशविधौ पतेत् मद्धरपन्नसान सर्वान्नवा
चयद्वा चकोन पतेन्नवम्यादिवत्यमाह देवीपुराणे इषस्य स्यं सितेपक्षे कन्याराशिगते रवौ बोधयेद्देवीं नन्दां कौतुकमंगलैः ज्येष्ठानक्षत्रयुक्तायां ष
ष्ठ्यां बिल्वाभिमंत्रणं सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनं पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणं उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवां
श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेदिति अत्र इति हूमाद्रियोर्णमास्यन्ताश्विनपरक न्याराशिगते इति मानुषिकत्वाभिप्रायकं न तु नियम
परं तादृशनवम्याः क्वचित्सिंहे व्यस्यपि संभवात् अत एव कालिके एव देवीं हृसे सुप्ते यात्र ध्वजन्क्रियाश्विने तुलायां बोधयेद्देवीं वृश्चिके तु जना
र्दनमिति वाक्येन तुलायां पद्मोत्थ न तत भुक्तं षष्ठ्यां बोधनाभिप्रायेण आषाढे मलमासपातादेन त्रपातादेन त्रषष्ठ्याम् एव संभवसंन्नगोणाश्वि
नेकृत्स्नवम्यां इति अत एव वाक्यरचना तु सर्वत्र अश्विनेमासाति मत्स्यपुराणान्तरे आद्रायां बोधयेद्देवीं मूलेनैव प्रवेशयत् पूर्वोत्तराभ्यां
संपूज्य श्रवणेन विसर्जयेदिति तथा लिंगपुराणे कन्यायां कृष्णपक्षे तु पूजयित्वाद्रभे दिवा नवम्यां बोधयेद्देवीं महाविभवविस्तरैरिति चतु
र्थ्यादेतुगीतवादित्रनिःस्वनैरिति कालिकापुराणे पाठः अत्रेदं पूर्वाह्णे नवम्यामाद्रानक्षत्रयुक्तायां बोधनं कर्तव्यं देवहूसत्वात् यत्र तु पू एमः
र्वाह्णे तरकालएव अज्ञातालाभेन तत्रैव बोधनं कर्तव्यं न चम्यामाद्रभे स्थितेऽन्त्र दिवा मात्रो क्तेः अथ तद्रात्र एवं करिद्वापदोपादानं व्यर्थं स्या ४
त् देवहूसत्वं सामान्यत एव तत्र पूर्वाह्णे माद्रः अत एव च्यन्नमुक्तं गौडग्रंथे वराहपुराणे कन्यादिमीनपर्यन्तं यत्र संप्राप्यते शिवः तत्र बोध

ःभकनद्योर्द्विवासरत्वे उभयत्रेति अत्र शिव आर्द्रा एवं च उभयदिने पूर्वाह्णे नवमीलाभे विपरीते वार्द्रालाभे बोधनं न युग्मात् पूर्वत्र युग्मात् पू-
र्वत्र युग्मव्यवस्था पूर्वाह्णे शास्त्रस्य वाधं किं तु तन्नक्षत्रानुरोधतः दिनार्द्धभोगे तन्नक्षत्रलाभे तु पूर्वाह्णे न वश्यमेव तत्कार्यं उभयत्र पूर्वाह्णे
तिथिनक्षत्रयोर्लाभे तु उभयदिने पूर्वदिने नक्षत्रस्य लाभे वा पूर्वेह्नि एव पूर्वाह्णे बोधनं कर्तव्यं युग्मात् अत्र च नवम्यामेव बोधन
विधितन्न नक्षत्रसंबंधः फलातिशयार्थं तथाष्टम्यां आरादिवपि तिथेः प्राधान्यं नक्षत्राणां गुणफलं पूर्वं पूजायाः प्रतिवर्षकर्तव्यत्वात् अत एव
देवलेनोक्तं तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनं योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि इति तथा लिंगपुराणेपि मूलाभावेपि सप्तम्यां केव-
लायां भवेच्चापि तत् तथा तिथ्यंतरेष्वेव नक्षत्रेषु तु पूजास्वयम् इति इत्थं च आर्द्रारहिते बोधनेपि मंत्रान्तरानुपदेशात् आर्द्रायां प्रकाशकमंत्र एव प्रणवयुक्ते
नवम्योर्मूः तदा अधिकयोगत्वाद्दोषो न भवति तथा च याज्ञवल्क्यः तथा न्यूनतिथिरित्थं च पश्चिमं द्वयं परस्य तिथिर्यः परमेष्वयम् प्रभुश्च यात्या मंच
यष्टचेतत्तदाकारप्रयुक्तेन सर्वं चाविकलं भवेदिति अत एव रात्रावेव महामाया ब्रह्मणा बोधिता पुरा तथैव च नराः कुर्युः प्रतिसंवत्सरं त्वयेति
कालिकापुराणवाक्ये रात्रिपि त्रिपदं देवता त्रिपदं बोधनं तत्र दाक्षिण्यायनमेव प्रमथादिवाबोधनवाक्यविरोधं स्यात् तथा च श्रुतितपस्तस्योक्ते
शरद्वसन्तग्रीष्मा वा संतिकादृतुः शुक्रश्च शुचिश्च ग्रैष्मदृतुमयेतद् दुर्गायनं देवानां दिनं नभश्च नभस्यश्व वार्षिकादृतुरिषश्चोर्जश्च
शारदावृतू सहस्यश्च हेमंतिकादृतुः अयनं दक्षिणायनं देवानां रात्रिरिति तत्र बोधनमंत्रो यथार्द्रेषमासस्मिन्पक्षेन वम्या मार्द्रयोगतः श्रीवृक्षे बो-
धयामि त्वां यावत् पूजां करोम्यहं रावणस्य वधार्थाय रामस्यानुग्रहाय च अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा इति॰ अत्र च केचित् नवम्यां

वौधनमष्टम्यां ॥ एतव्रतस्यवधाथा परामस्यानुग्रहीयच ॥ च्युकालेवुद्ध्याणवोधोदेव्यास्तपिह्नत्तपुरतित्र्य
५ न्नचवे॥ चित्तनवम्यां॰ शभुजायाः॰ष थ्यांतु दश भुजायावोधनस्यविशेषाभिधानात्त ॥ तथैवयुक्तमितिवदतिन्न
सप्ययगितिप्रतिभाति ॥ तथाहिस्यान्नभद्रचायीस्तिथित्तेप्रदर्शितेकापुराणे ॥ एवकम्याख्याय चमूर्तिप्रकरणे
॥ शरत्काले पुरा यस्मान्नवम्यांवोधितासुरैः ॥ सारदासा समाख्याता पीठेलोके च नामतः॰ रसुपक्रम्यरूपमस्याः॰ पुराणोक्तं सिंहस्थं दश
वाहुभिः तथास्यपत्वष्टादशभुजं पूर्वोक्तं विनिर्दिष्टादिति तथायं चानन कासरं चैदेमम गे न प्रउं ये पादिनसिं हमहिषपुत्रकाम्याः दश भुजापाया अपि नवम्यां वो
धनं युक्तं अतएव तन्त्रे वउग्नचरैतियाम्भौतिमङ्कालिग्रहं पुनयपाम्हसो त्वाह निष्पेसादुर्गास्यभिधीयते ॥ एतासुमूर्तिषुसप्त पादलग्नेनोन्नएणां संद्
पूस्येन विष्यसित्वं वैदेवानामपिरक्षसामिसनेन का साथमादुर्गाया: पादलग्नत्वे नमहिषासुरस्य पूज्यत्वं पूर्वेणव्यतराव चाष्टादशभुजा
याः पादलग्नत्वं महिषासुरस्य न संभवति॰ तस्माद्दशभुजायानवम्यां षाठ्यां वासंवाधनंयुक्तमिति षष्ठ्यांवोधन चाने महर्षोपिवयते रस
नी प्रतिपदादिकपक्षपउच्यते तन्त्रहृसवक्ष्यलतादेभीष्यविष्यपुराणे आश्विने क्लृप्तपक्षेतक सेव्यनवरात्रकं प्रतिपदादिक्रमेणैव यावद्दशन
वमी भवेत् त्रिरात्रं वापिकर्तव्यंसप्तम्यादिर्यथाभ्यधमिति नवरात्रकमितिक॰ स्वार्थोपपद्यप्यत्र नवानां रात्रीणां समाहारः नवरात्रमिति राम:
योगार्थसंभवत्तपापि तत्कालस्यनतु षेपतया रात्रिपरं नवरात्रं परं वा प्रतिपदादीतिविशेषाभिधानेन लक्षणयाप्रतिपदादिनवतिथि ५
विधीयमानपूजोपवासादिकर्मपरं नतु वनवाहोरात्रसंध्यापरे अतएवतत्कर्मणाम्ध्वतिथिर्थहासवृध्यावाधकाचि दृष्टभिर्देशाभिशवी अहो

रात्रिनिष्पाद्यत्वेऽपि न क्षतिः परं तु यत्र प्रतिपदा पञ्चदशी तिथिः पूर्वदिने षष्टिदंडात्मिका परदिने मुहूर्तादिकं वर्द्धते तेन तत्र पूर्वदिने तन्निष्पन्नितपजा
दिकं कर्तव्यं परदिने तत्त्वं उदयमलत्वेन पूजाद्यनर्हत्वात् यदुत्तरदिने उदयमात्रसत्त्वाभिप्रायात् अत्र तिथिनिमित्तं पूजोपवासादिकं त
द्दिन एव भवति अतो मध्यवर्तिदिनस्य तत्कर्मणि पारणाद्यनुपयुक्तत्वाद्यथा कथंचित्पापाद्यादिकं दत्वा आरब्धनियमेन स्थातव्यं आरब्धत्व।
त्समपर्णत्वानुरोधादिति नवरात्रपदं चरेद्बुद्ध्या प्रतिपदादिहितरात्रिपूजननिमित्तनक्तं व्रतेन रुद्धं तथा च पुराणान्तरे बालकं एव च वि
ध्यवासिन्यां नवरात्रिपवासतः एकभक्तेन नक्तेन तथैवायाचितेन नरः अयथवा न वनं ते स्थेन वनं ते समापयन् नक्तव्रतमिदं पार्थ सर्वपापू
र्णाशनं सर्वकामदं नराणां सर्वसद्धुनिवर्हणं आश्विनासितपक्षशुक्ले नवरात्रिविशेषतः स्यात्तस्मान्वदुर्गा चानल कुर्यात्समाहितः पूजनीया ज
नैर्देवि स्थाने स्थाने पुरे पुरे गृहे गृहे त्रिपथे च ग्रामे ग्रामे वने वने स्नातैः प्रमुदितैः हृष्टैः ब्राह्मणैः क्षत्रियैर्नृपैः वैश्यैः शूद्रैः भक्तियुक्तैः म्लेच्छैरन्यैश्च मानव
भैः स्त्रीभिश्च कुरुनंदन तद्विधानमिदं शृणु नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतं धर्मार्थकाममोक्षार्थं मनुष्यैः पिहितं द्विजा भक्तिभिः परम् पु
ष्पधूपैश्च चण्डिकामभिपूजयेदिति नक्तात्रोपवासतः न तु उपवासतः अयथवेति पक्षान्तरं मेतत् एतस्मिन्नक्तव्रतं निशामुखे पार्थ पूजयेत्सु
भयं विधेयं फलं विशेषार्थिनामिति अतो योगिनामर्कव यत्रोपवासाद्यन्यतरः नियमपूर्वकं देवकर्मेतरयास्त्रिवा देवीपूजयेत् न ह्वि धेयामिति
तात्पर्यार्थः तथा च देवीपुराणे आश्विनस्य सिते पक्षे प्रतिपत्सु यमाक्रमं सुस्नातस्तिलतैलेन पूर्वाह्णे पूजयेच्छिवामिति नवनक्ते इति निर्णोत्सर्गि
क परमेतत् एवमन्यपि तेन ति पोन्हासवृद्धिभ्यामन्यूनाधिकोऽपि न क्षतिन नवरात्रिं नामकं अत एव तादृशन नक्तव्रतेन नवरात्रपदं परिभाषितं भव

तिअन्यत्ररात्रियरत्नयोगस्तुलजं णायैवनातुयोग्नाग्नयणाहिद्वक्रश्रातलक्षणयापिहष्टेयोगापहुारित्वनियमारिनितथाऽऽष्विनेमासिमेचान्द्रेप्रतिप
६ घातिथिर्भवेत् तयानक्तंप्रकुर्वीतरात्रौ देवीञ्चपूजयेदितितथारात्रिरूप्यपनोदीवीदिवारूपोमहेश्वरः रात्रिवनमिदं देव्यारात्रौकर्त्तव्यतेष्यतेन
क्तव्रतहिसिद्दंपश्चाद्व्याथानरकेगतिरितिअतथाअयनारात्रेचसप्तपंचत्रिकापिवाएकभक्तेननक्तेनायाचितोपोषितैः क्रमादितितथान्यत्रापिआ
श्विनेमासिमेघातेमहिष्यासुरमर्द्दिनीनिशासुपूजयेद्भक्त्यासोपवासादिभिः क्रमात्वर्षेवर्षेतुकर्त्तव्यंनरैर्भेतिपरायणैः अत्रचसोपवासादिभि
6 रित्सनेनेयथोतथैवपूजात्मसनेन० अथवाअग्न्ययुजेशुक्लपक्षमासाद्यनंदिकांसमरभ्यतनोदेवीमहविष्यश्रीजितेन्द्रियैरितिमनतत्सोक्तेनचपूजा
यामुपवासादेहेविष्यान्नस्यचागत्वंप्रतीयतइतिसोपवासादिभिरितिउपवासेकभक्तनक्ताघन्यतमसहितध्यानधारणादिसंयमैरिसर्थतथात्रि
काम्लपूजयेद्देवींमहाभक्तिसमन्वितइतिअत्रचमहुर्त्तात्मूनाउदयगामिनीतिथीर्यादिपरदिनेभवतितदापूजनेसैवग्राह्यातथाचचन्द्रनारायण्यां
त्रिमोपयोगोपसंवादेश्रात्कालेमहापूजानिगदितेयाचवार्षिकासाकार्योदयगामिन्यांनतत्रतिथियुग्मतेतितथाउमरतन्त्रेअमायगुक्तानकर्त्तव्याप्र
तिपत्पूजनेममसुद्धतेमात्राकर्तव्याद्वितीयादिगुणान्वितेतिद्वितीयादिगुणेतिद्वितीयाआदिभागरूपोयोगुणास्तदान्वितेसर्थः यदिस्मोहात्सकु
र्वीतप्रथमेस्थापनंममनस्यत्रापायुतांदत्वामस्मशोकंकरोम्यहमितिनयमेगयमरवंदेअमायुक्तेनियावत्तथाकुहकास्थेयंसंयुक्तांवर्जयेत्सतिपति राम:
थिंराज्यनाशाययसानैकानिदिताचाश्वपूजनेइतितदेवीपूराणेतथांग० येचकुर्वेतममायुक्तांतेषांपुत्रोविनश्यतीतितथामार्गवाचनदीपिकोक्तत्वे ६
नयकिनंदर्शककलयायुक्ताप्रतिपच्चंडिकार्चनेउपयदयेद्विमुहूर्त्तोणिमाह्यासादयगामिनीनिदिष्टामुहूर्त्तयासत्रापिनाएकमुहूर्त्तायाः समञ्चयतिथिद्व

मुहूर्त्तैकदेशमुहूर्त्तयोर्मुख्यानुकल्पत्वं च प्राक् सामान्यप्रकरणेऽवोक्तं प्रतिपत्तु अमायुक्तैव कर्त्तव्या प्रतिपच्चंडिकार्च्चने नगोष्ठ्यापरयुक्ताऽऽह संता
नकांक्षिभिरिति ॥ सिंहप्रसाद धृतं यमप्रतिपच्छेषसंयुक्ता द्वितीयापापांप्रमाचर्नेकृतं घ्नन्तो नाशयति संततिं पुत्रपौत्रकी अमायुक्ता व सा ग्राह्या प्रति
पच्चंडिकार्चनेनइति देवसुक्तिरूपं धवलनिबंध धृतमत्स्यद्वितीयाशेषसंयुक्तां प्रतिपच्चंडिकार्चने मोहाद्योयदेशो हाहन्ता पुत्रं विनाशयेत् आरंभेनव
रात्रस्य द्वितीयाचुटिसंमितानकेवलं तिथिहंमिवेध्यात्सापुत्रसंपद्धि इति ललवसविहितो नत्वे न पठित यन्न द्वितीया रिक्तलोपेता प्रतिपच्चंडिकार्च
नेवराजेनेवनीया प्रथमलेनविषलेनाविषलेश्शेषधान्यसीतिपठितं तद्द्रूषमामाणिकत्वं चेवुरअधतत्वात् मूलं यदि चेतेषां समूलत्वांगीकार
स्तदापसर्वेन नक्ते भोजनं मा प्यात्मेन रात्रौ देवीपूजनं चफलविशेषार्थिनाप्रमितं प्राकृतसप्तविषयकमेव अमायुक्तं प्रतिपद्ग्राहकं तावद्वा
क्यपातं वो ध्यमतो मिथोविरुद्धत्वेन प्रतिभासमानानां मुपदर्शितं वाक्यानां नं विरोध इतियुक्तं चैतत् तथाहि कर्म्मणो यस्य यः कालस्तत्कालव्या
पिनी तिथिनप्राक् कर्म्माणि कुर्वीत ह्रासवृद्धी न कारणं इति स्मृत्यादिवाक्येन कर्म्मकालीनतिथ्यप्राह्यत्वं प्रतिपादितं अतः पूर्वाह्णे नवरात्रपूजारंभेतन्मू
लकानां द्वितीया युक्त प्रतिपद्ग्राहकवाक्यानां प्रतिनक्तभोजननियमे निश्चयं नवरात्रपूजारंभे अमायुक्त प्रतिपद्ग्राहकवाक्यानां प्रवृत्तिः नक्ता
दिव्रयोगेतुरात्रिगोविशिष्यतर्हासुत्तैरिति घसुधामि च्चोयं अन्यच प्रतिपदिकलशस्थापनादिकं च प्रातर्देशरं उम ध्ये कार्यं तथा च विष्णु
धर्मे भास्करोदयमारभ्य यावत्तु दशनाडिकाः प्रातःकाल इति प्रोक्तः स्थापनारोपणादिषु तत्र प्रदि प्रतिपदा चापोऽश्रांशराद्दूरस्रांश्रावाभवति
तदातन्निहायप्रयरा ह्नेकलशस्थापनं कुर्यात् तथा चित्रानक्षत्रेणवैधृतियोगेन वा युक्ता प्रतिपच्चेत्तदा तन्मोरतेकलशस्थापनं कुर्यात् तथा च रा

क्षिणासमन्थे देवीपुराणे आषाढः बोड्शनाडीस्तु लग्नाय: कृतेन र: कलशस्थापनं तत्र स्यादिष्टजायते भूयं अ पाद्यस्तु नाडिकास्त्य स्ताः षोडशनाडी
७ स्तुलहार्दशापिदा अपरान्हेपि चकर्तव्य शुद्धसन्तति कांक्षिभि: त्वाष्टावेधतियुक्ता चेत्तु तिपच्चडिकार्चने तयोनरं तेवि घातव्या कलशोरोपणा गृहे
तिता श्रूचि त्रात यो श्वित्राबैधसोर्यदिच प्रतिपद्दिचि त्राबैधतिर्वोसूर्यास्त कालपर्यतं तत्परतो वा तिष्ठति गतरद्वारात्रौ स्थापननिषेधात त
योरघांशात्रयं आघांशद्वयं वापरित्यज्य दिवसएवस्थापनादिकं कुर्यात् तत्था चमविष्ये चित्राबैधतिसंपूर्णा प्रतिपच्चेन्द्रवेन्नृपसाज्ञात्यशाल्ल
पत्वाघास्तुरीयांशेतुम पूजनमितितथा कासापनेनाप्युक्तं प्रतिपघाखितेमासि भवो वैधतिचित्रयो आघपादौपरित्यज्य प्रारभेन्नवरात्रक
मितिभवः संभवयदि तिरोषष्ठेयदिस्थचारिनादशाउदंडप्रभ्ये प्रतिपदिचित्रायोगश्चिचात्राबैधसोरन्यतरापघपादाभ्यांवासर्वदिनेनव्या
प्रिस्तदातत्सत्वेपि अपरान्हे कलशस्थापनादिनरात्रौतथा चतर्यो वैचचित्रान्विता चेत्प्रतिपत्कालभ्यते विरुद्धयोगेरपिसंगतासती सेवा
परान्हे विधेर्विषयो स्त्रीपुत्रराज्यादिवि वृद्धिहेतुरितितयामानरात्रौस्थापनंकुर्यात्नचकुंभाभिषिभिषेचनमिति अत्रेदंतत्वकलापनवा
केन उपसंहारेप्रारभेनवरात्रकमिसन्दक्षिनामप्रभ्ये पहृयनवरात्रापरदसेहृष्यानत्तः व्रतघटितनिशामाहगविहितदेवीपजनस्योपस्था
पवत्याचित्राद्रितिबेधवाक्यानानत्तः व्रतघटितमुरव्यीभूतनिशापूजनकस्यमात्रेप्रवृतिरवगम्यतेनमुख्यो॥ भूतपूर्वान्हविहितदेवीपूज रामः
कल्पेपिनवरापरस्यमरव्यार्थवाधेनतादशालक्षणा कल्पनेप्रमाणाभावादितिध्येयं केचित्तु चित्राबैधतिनिषेधोनचण्डिकापनेविषय ७
:किंत्वश्वपूजननिमितकलशस्थापनविषयक अश्वयुक्कृष्णप्रतिपत स्वातियोगेशुभेदिनेर्सादिप्रदशांपियमाह्यवाकास्वातिवि

धानेन तस्मिन्दिने चित्रादिनिषेधसिद्ध्या शुभे दिने रूसनेन वेध्य स्वातिदिने निषेधसिद्ध्या च एतद्वाक्यैकवाक्यतया चित्रादिनिषेधवाक्येस्य अश्वपू-
जनमात्रविषयकत्वकल्पनौचित्यात् इत्यत्र च देवीपुराणवाक्ये चण्डिकार्चने रूसादेश्यं डिकार्चनो रूपचित्रावेध्य संते यसंते अश्वपूजार्थक-
लशस्थापनमिसर्थो वोध्यः एवं भविष्यभवाक्ये भजनमिसस्मादश्वपूजनमिसर्थः तथा च कलसस्थापनवाक्ये नावरात्रक मिससप्रतिपदादिनव-
तिथिविहितमश्वपूजनमिसर्थो वोध्य इति वदन्ति तदस्मागेव प्रतिभाति तथा हि प्रतिपत्स्वातियोगे शुभे दिने रूसा स्थापिकवाक्ये तस्मात्सैते स्व-
त्रपूजप्रदर्शनेन पदे शुभे दिने स्वातियोग एव प्रतिपादि अश्वपूजनं विधीयते तदा चित्रावेधसोऽस्य पूजनस्य प्रसक्त्यभावेन तन्निषेधो विफलः तदं-
स चरणादि प्रतिप्रसवोऽपि फल प्रतिपदत्र स्वातियोगशुभदिनयोरप्यं त्वात् तथा चाश्वपूजनस्य केवलकालमात्रकर्मत्वात् स्वातियोगं विना तद्दोषे प्रति-
पदि न तदन्तरा चरणमिति यदि च प्रतिपद्येवाश्वपूजनं विधीयते तेन त्र स्वातियोगः शुभे दिने त्वं च फलातिशयार्थकं तया गुणफलमिसु च्यते तदा सुत-
रामेव अश्वपूजनविधायकवाक्ये चित्रादिनिषेधता सर्वभावेन चित्रादिनिषेधवाक्यस्य तदेकवाक्यताभावः तस्माच्चित्रादिनिषेधविधेः स्वाति-
योगेऽप्येवं प्रवृत्तिर्वाच्या एवं च चित्रादिनिषेधकवाक्यस्य अश्वपूजनमात्रविषयकत्वे प्रमाणाभावः प्रस्तुतपूर्वोक्तनिषेधवाक्ये चण्डिकार्चने रूसादे-
श्यं चण्डिकार्चननिमित्तं कलशस्थापने मिसौत्सर्गिक प्रतिसा चण्डिकार्चनमात्रविषयकत्वमूनगम्यते अतश्चण्डिकाद्यर्चने रूसत्र समग्र्याऽजन्तरत्वार्थे
लक्षणया आन्नाय्यत्वमिति तथा कलसस्थापनवाक्योपसंहारे प्रारम्भेऽन्यत्र नवरात्रक मिसनेन रूढ्यान वरात्रत्वविशेषोपस्थिसा चित्रादिनिषेधवाक्यानां च-
ण्डिकार्चनमात्रविषयकत्वमनवगम्यते इति दिक् सप्तरात्रादिकल्पेषु प्रान्ते नवरात्रस्थापनादि तत्र विशेषाभावादिति ॥ अत्र च कलशस्थापनादिप्रका-

रभ्यानेवक्ष्याते अथ नवरात्रोपवासादिनिर्णयः तत्र मार्कण्डेयः पूर्वविद्धा तु या शुक्ला भवेत्प्रतिपदाश्विनी नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता तथा
८ देवीपुराणे कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकां अयाची ह्यथवैकाशी नक्ताशी वाथवा पदः वा पदे वा पुष्पसोमे स्नात्वा पीतवासं त्र्यकुर्मी जये
नत्मुखस्त्रालंकारद्यैनेमस्संतोष्या प्रतिवासरं लिंच प्रसहं रघाक्षेद्नमासमाप्तवतृप्तिकालं पूजयेद्देवीं जपस्तोत्रपरायणा इति अत्र च अचयाची अ
यराकाशी नक्ताशी अथ यवा घटः इसस्यद्धिः पाठन प्रतिपदमारभ्याष्टमीपर्यंतमयाचितादीनां द्विरभ्यासः नवम्यां च केवलपूजैसेवरूपं नवरात्रमि
8 साहहेमाद्रिस्तन्नसम्यक प्रतिप्रतिवाक्येअयाचितौरात्तृत्तितास्मर्येन वम्यामपितत्तीमाह्नमारंभे अयाचिता दानस्येद्रसंभवात् तथा केवलोपवा
सादिभिरपि नवरात्रव्रतमन्ते हेमाद्रौ भविष्ये एव चर्विं ध्यवासिन्या नवरात्रोपवासतः एकभक्तेन नक्तेन तयेवायाचितेन चेत्पादिस्तथा तत्रैव
धौम्यः आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकं प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रममिति अत्र
च नवम्यादिनवमीपर्यंतानी घ एविधकल्पेषु अभिधिकन्युनेषु नस्तकाशतमेराद्यवस्याकाम्ये शान्त्यापानचतारात् किंतु फलतारतम्येच्छादि
णा इति इत्थं वचनवरात्रव्रते शान्तस्त्रिरात्रे चैकरात्रकं व्रतं चरति यो न तस्मै दास्याभिवांछितमिति इदेवीपुराणवाक्ये अशक्त इतिवदुक्तं तत्
येस्तु कुलक्रमेणैव नवरात्रव्रतमाचरितं तन्नासामर्थ्येन तद्विषयकमिति इदानीं नवरात्रसंबद्धप्रसंगेपि सूतकप्रसंगपुनर्विचार्यते यथा विघ्न एमः
रूपमिव घं आश्विनस्याश्विसिते पक्षे प्रारब्धे नवरात्रके शावसूतके समुत्पन्ने क्रिया कार्या कथं बुधैरिति प्रश्ने उत्तरमथाप्सूतकवर्तमाने च नत्रो ८
सत्त्वं पराभवेत् देवीपूजाप्रवर्तनया पशुप्रहविधानत इति तन्न नवरात्रे प्रवर्तमाने प्रवर्तमाने आरब्धे इति प्रावत् सूतकं प्रहा इसत्त्वं भवेदि

सञ्चयः तथा चंद्रनारस्य सूतके सतो दोषो देवि तिनत्र पुरोधसा कर्तव्यमिति आगेवा नं पत्नु सूतके पूजनं भोक्तं दानं चैव विशेषतः देवीमुद्दिश्य क
र्तव्यं तत्र दोषो न विद्यते सूतकं दानं चैव विशेषतः देवीमुद्दिश्य कर्तव्यं तत्र दोषो न विद्यते सूतकं नवरात्रविषयकमिति इदानीं प्रतिपदि कलशस्थापन
मुच्यते आश्विन शुक्ल प्रतिपदि कृतस्नानः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं एवं भक्त्यादिनियमं गृहीत्वा नवमी यावद् जपमाचरेत् स्वयं महेश आचा
र्यं कृत्वा वेदिकां च स्वल्पवेदिकायां गणपत्यादीनां देवतापूजार्थं भूमिं भूमिसीमादिना कलशं स्थापयेत् ततो वेदिकायां यथाविधि देवी कल
शं संस्थाप्य वक्ष्यमाणरूपां देवीं मातां क्षमां विधिना देव्या महापूजां प्रत्यहं कुर्यात् तत्र देवीगृहलक्षणं भविष्योत्तरे यथा दुर्गागृहं प्रकर्तव्यं चतुर
स्रं सुशोभनं रम्यं स्वस्तिकापेतं चर्चितं वस्त्रमण्डितं गोमयेन प्रमाण्यां चित्रं शस्त्रसमन्वितं तन्मध्ये वेदिका कार्या चतुर्हस्ता समा शुभेति च
तुर्हस्तेति चतुरस्रेति ह्यन्यत्र पाठः रक्तवर्णामलेलानं मण्डलादिकं कृत्वा ततो देवीं प्रपूजयेत् प्रपूजयेत् मुहूर्तेन प्रतिवर्गाभिश्च पूर्वे कृत्वा तु वेदिकां प्रवा
लैवापथेन वर्णो भूमेश्चापि संयुतानन्तरं संस्थापयेत् कुम्भं विधिना मंत्रपूर्वकं सौवर्णं राजतं वापि ताम्रं मृन्मयं जंतुवेतत्रावाहनमंत्रः आग
च्छ वरदे देवि दैत्यदर्पनिषूदिनि पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये सर्वतीर्थमयं वारि सर्वदेवसमन्वितः इमं घटं समागच्छ तिष्ठ देवगणैः सह दुर्गे
देवी समागच्छ सान्निध्यमिह कल्पय बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह इति ततः पूर्वस्यापि न घटेगणपत्यादीनां देवतानां महादी
श्च संपूजनं तस्यापि च देव्या कलशस्थापनपूर्वकं यथाविधि देवीं मंत्रपूर्वकं पूजयेत् तत्र ध्यानं यथा जपकुसुमसमप्रभां मे हृदि हृत शेषरां लोचनत्र
यसंयुक्तां पूर्णेन्दुसदृशाननां तप्तकाञ्चनवर्णाभां सुप्रतिष्ठां सुलोचनां नवयौवनसंपन्नां सर्वाभरणभूषितां सुचारुदशनां तन्वीं पीनोन्नतपयोधरां शि

मंगंस्थानस्थंस्थानामहिषासुरमर्द्दिनीमत्युग्रांशायतसंस्थशाद्दशबाहुसमन्वितांत्रिशूलंदक्षिणेध्येयंखड्गंचक्रमादधःतीक्ष्णबाणंतथाशक्ति
१ वाहुसंशोषसंगनंखेटकपूर्णचापंचपाशंधांकुशमर्द्धतःघंटांवापरशुंवापिवामतसंनिवेशयेत अधस्तान्महिषंतद्वद्विशिरस्कंप्रदर्शयेत शि
रश्छेदोद्भवंतद्वद्दानवंखड्गपाणिनंहृदिशूलेननिर्भिन्नंनिर्यदंत्रविभूषितःरक्तरक्तीकृतांगंचरक्तविस्फारितेक्षणंवेष्टितंनागपाशेनभ्रुकुटी
कुटिलाननंसपाशवामहस्तेनधृतकेशंचदुर्गया वमद्रुधिरवक्त्रंचदेव्याःसिंहंप्रदर्शयेत देव्यास्तुदक्षिणंपादंसमंसिंहोपरिस्थितंकिंचिदूर्ध्वंत
९ थावामपदांगुष्ठंमहिषोपरि स्तूयमानंचतद्रूपममरैःसन्निवेशयेदिति तत्रपूजामंत्रमाहदुर्गाभक्तितरंगिण्यांदेवीपुराणेकार्यादेव्यास्तुमन्त्रेण
पूजाक्षीरघृतादिभिः जयंतीमंगलाभद्रकालीकपालिनीदुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते अनेनैवतुमन्त्रेणजपहोमौच
कारयेदितीक दुर्गादुर्गेरक्षणिस्वाहेतिनवाक्षरोयंमंत्रःपूजायांवाविकल्पइतितत्रप्रतिपदादिनवमीतिथिपर्यंतक्रमंकर्तव्यमाह भविष्ये के
शसंस्कारद्रव्याणिप्रदद्यात्प्रतिपद्दिनेपट्टडोरंद्वितीयायांकेशसंयमहेतवेदर्पणंतृतीयायांसिंदूरालक्तकंतथाथ्यमधुपर्कंतुपंचम्यांतिलकंने
त्रमंजनंपंचम्यामंगरागंषण्यांभ्वमन्ताअलंकरणानिचषष्ठ्यांविस्तरतोवाचंसायंसंध्यासुकमलपत्रसम्पन्नामानतरानीयगृहमध्येमयपूजयेत्पंचो
षणामथाष्टम्यांमष्टशक्तेःप्रपूजानंनवम्यामुत्तमंचैजाचयास्तहदेवार्चनंशिवापूजाचवलिदानंचनहन्मात्प्रपूजयेत्कुमारीपूजनीयाच रामः
भूषणैःसंपूज्यभोजयेत्कुमारीशम्मांसावदोत्सवेनानेनविधिनायस्तुदेवींप्रीणयतेनरस्तंस्ववत्सलयेन्नंतुदेवीसर्वापदिस्थितंपुत्रदारधनैर्हीनास १
स्यातस्पनविघ्नेभुक्त्वाचविविधनभोगान्तेसरेवगणोभवेदितितयागतिपदादिक्रमेणदेव्याःखड्गादिधारणाभ्रवणातत्रदानव्यवहारोपि

यथा भविष्यान्नरे प्रतिपद्यात् तं खङ्ग. द्वितीयायां धनुस्तृतीयायां करे चक्रं चतुर्थ्यां च भ तिशूलंयं पंचम्यां मारे स्थूलं षष्ट्यां तु परशुं तृतीयागदा
मविभ्रं सप्तम्यामष्टम्यां शक्तिं मुद्गरं नवमी च सर्वदेव्या नर्त्ति दैत्यविनाशिनी तिलयाप्रतिपदमारभ्य नमसहं एकैकवृद्ध्या द्व्यादिबलिं एकमेक
वा बलिं दद्यात् बलिदानप्रकारस्तत्रैव स्थिते अथात्र फलं विशेषार्थी नवरात्रिषु प्रतिपदमारभ्य नवमीपर्यन्तं प्रतिदिनमेकैकां कुमारीमेको
नरवृद्ध्या द्विगुणवृद्ध्या त्रिगुणवृद्ध्या वा प्रतिदिनं नवनवां पिवा यथाशक्ति संपूज्य भोजयेत् तथा च हेमाद्रौ स्कान्दे एकैकां पूजयेत्कन्यामेकवृ
द्ध्या तथैव च द्विगुणं त्रिगुणं वापि प्रत्येकं नवकन्तु वा नवभिः कुंकुमैः वस्त्रैर्गन्धपुष्पाक्षतादिभिः ब्राह्मणी सर्वकार्येषु जयार्थे नृप
वंशजा लाभार्थे वैश्यवंशोद्भवां सुतार्थे शूद्रवंशजां वा रूपेणाथ संज्ञानां च पूजयेद्धनार्थी नरः लिंगेनवभिर्लभते भूमिमैश्वर्यं द्विगुणेन च एक
वृद्ध्या लभेत्क्षेममेकैकेन श्रियं फलमेतदेकवर्षा तथा वर्षस्यापूजार्थं ता विवर्जयेत् गंधपुष्पफलादीनां प्रीतिस्तस्या न विद्यते द्विवर्षा च त्रिव
र्षा च त्रिमूर्तिनाना चतुर्वर्षा तु कल्याणी पंचवर्षा तु रोहिणी षड्वर्षा तु भवेत्कालीसप्तवर्षा तु चण्डिका अष्टवर्षा शांभवी तु दुर्गा नववर्षिका स्मृ
ता दशवर्षा सुभद्रेति नामभिः परिकीर्तिता अतऊर्ध्वं तु या कन्या सर्वकार्ये विनिंदिता द्विवर्षादि पूजने फलं चाह तत्रैव दुःखदारिद्र्यनाशाय शत्रू
णां नाशनाय च आयुर्बलवृद्ध्यार्थं कुमारीं पूजयेन्नरः आयुःकामस्त्रिमूर्तिं तु त्रिवर्गस्य फलप्रदां अपमृत्युव्याधिपीडादुःखानामपनुत्तये सौख्य
धान्यधनारोग्यपुत्रपौत्रादिवृद्धये कल्याणीं पूजयेद्धीमान् संकल्याणवृद्धये आरोग्यसुखकामी च जयकामी तथैव च यशःकामो नरो
नित्यं रोहिणीं परिपूजयेत् विद्यार्थी च जयार्थी च विशेषतः शत्रूणां च विनाशाय कालिकां पूजयेन्नरः ऐश्वर्यसुखकामी च स्वर्गकामी च यो
नरः संग्रामे जयकामश्च चंडिकां परिपूजयेत् दुःखदारिद्र्यनाशाय परसंमोहनाय च महापापविनाशाय शांभवीं च प्रपूजयेत् सजयेत्

सर्वलोकत्ररत्र शत्रूणामुग्रसाध्यनककर्मणि दुर्गां दुर्गविनाशाय पूजयेच्चलात्तिबुधः सौभग्यधनाद्यादिवांच्छीतीर्थफलाप्तये सुभद्रां पूज-
१० येन्नरः सौदासी चमस्वविवद्धसे इति वर्जितामाह तत्रैव गंधिस्य दितगलत्कुष्ठांगीं रक्तपूयव्रणांकितां जात्संधां केकरां काणीं कुरूपां तनुलोमशां
संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवामिति अत्र च रोगादिरहिता अलाभे काम्यकर्मत्वान्न कुमारीं पूजयेदिति अत एव अरोगिणीं सु-
पुष्टां यांगीं सुरूपां व्रणवर्जितां एकवंशसमुद्भूतां कन्यां सम्यक्प्रपूजयेदिति नश्रेवोक्तं तच्च मेधातुकुमार्यादीनां पूजामंत्राउक्तान्तत्रैव प्रातःकाले
विशेषेणाहूता स्पर्गोविशेषश्च आवाहयेत्ततः कन्यामंत्रेणानेन मर्गवमंत्राक्षरमयीं जक्ष्मीमात्रीणां रूपधारिणीं नवदुर्गात्मिकां साक्षा-
10 त्कन्यामावाहयाम्यहं इत्यावाहनमंत्रः ततः संपूजयेद्धीमान्मंत्रैरेतैः पृथक् पृथक् जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणी पूजां गृहा-
णकौमारि जगन्मातर्नमोस्तुते इति कुमारीपूजामंत्रः त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीं त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्य-
हं इति त्रिमूर्तिपूजामंत्रः २ कलात्मिकां कलातीतां कारुण्यहृदयां शिवां कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहं इति कल्या-
णीपूजामंत्र ३ अणिमादिगुणाधारामकाराद्यक्षरात्मिकां अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहं इति रोहिणीपूजामंत्रः कामचारीं शु-
भां कांतां कालचक्रस्वरूपिणीं कामदां करुणोदारां कालीं संपूजयाम्यहं इति कालीपूजामंत्रः ५ चंडवीरां चंडमायां चंडमुंडप्रभंजिनीं
पूजयामि महादेवीं चंडिकां चंडविक्रमां इति चंडिकापूजामंत्रः ६ सदानंदकरीं शांतां सर्वदेवनमस्कृतां सर्वभूतात्मिकां लक्ष्मीं शां- रामः
भवीं पूजयाम्यहं इति शांभवीपूजामंत्रः दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीं पूजयामि सदा भक्त्या दुर्गां दुर्गतिनाशिनीं इति दुर्गापूजा- १०
मंत्रः ८ सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीं सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहं इति सुभद्रापूजामंत्रः अत्र च आश्विने शुक्ल-

पक्षे मूलनक्षत्रे सरस्वतीस्थापनमुक्तं रुद्रयामले मूलक्षेषु सुराधीश पूजनीया सरस्वती पूजयेत्प्रत्यहं देवि यावद्वैष्णवमृक्षकं नाध्याप
येन्न च लिखेन्नाधीयीत कदाचन पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तम इति वैष्णवं श्रवणं पत्रव्यवहारश्च पाद्मे आश्वासद्वासिणा
सानामितिके चित्प्रतिपदादौ ब्रह्मचारी नामापि पूजनं कर्वन्ति तथा कालिकापुराणे अग्निर्ब्रह्मा भवानी च गजवक्त्रो महोरगः स्कंदो
भानुर्मातृगणो दिक्पालश्च नवमग्रहाः एषां यदेतु मत्स्येकं पूजयित्वा यथाविधि मूर्तिं पवित्रामेकैकां कांद्यादेवसमाहित इति पूर्वं प्रति
पदादिक्रमपूजायां सामान्यतः षष्ठ्यां बोधनादिकं सूचितं सप्तम्यादौ यथासंभवं देवीप्रवेशपूजादिकं सूचितं तथा सप्तम्यादि
नवम्यादिकल्पश्च सूचितं दृष्टव्यं संक्षेपेणातः सर्वमभ्यूहितम् प्रतिपद्यते तत्र षष्ठ्यां सायंसमये स्वस्तिवाचनगानपसादिनादेवतापू
जापूर्वकं बिल्ववनं समपूज्य तत्र देवीं बोधयेत् तदुक्तं भविष्योत्तरे षष्ठ्यां बिल्वतरौ बोधं सायंसंध्यासु कारयेत् इति तत्र सध्योक्ता
वराहमिहिरेण अर्द्धास्तमयात्संध्या व्यक्ताभूता न तारका यावदिति तत्र बोधनमंत्रपठनीयोपयोगी रावणस्य वधार्थाय रामस्यानु
ग्रहाय च अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयाम्यत इति तथा बिल्ववृक्षे आमंत्रणमपि
कर्तव्यं तत्रामंत्रणमंत्रोपयोगी देवीपुराणे मेरुमंदरकैलासहिमवच्छिखरे गिरौ जातः श्रीफलवृक्षस्त्वमम्बिकायाः सदा प्रियः श्रीशैलशि
